अथ प्रस्तावः ।

कातीय परिशिष्ट सूत्रों सहित आन्हिकसूत्रावल्यादि पुस्तकोंमें भोजनविधिप्रयोग छप चुका है जिसको पंडित लोग जानते और कोई २ करते भी होंगे । परन्तु सुगम भाषा टीका सहित भोजन विधि का प्रयोग पृथक् नहीं छपा है। और आन्हिक सूत्रावली पुस्तक बड़ा होने से सब कोई ले भी नहीं सकता है । इस लिये सर्व्वसाधारणकी सुगमताके लिये तथा वेदोक्त धर्म कर्म के प्रचारार्थ हमने संक्षेपसे भाषा व्याख्यान सहित छपाया है । भोजन सभीको अवश्यमेव करने ही पड़ता है सो यदि ब्राह्मणादि द्विज तथा विशेषकर ब्राह्मण लोग इस विधि से भोजन किया करें तो दश पांच मिनट समय भले ही अधिक लगे परन्तु इस विधान से भोजन करने से भी कुछ २ धर्म नित्य २ सञ्चित होते २ बहुत सा धर्म सहज में बन सकेगा । जिन २ कामों को अवश्य करने पड़ता है वे भी यदि शास्त्र की आज्ञानुसार ठीक २ विधि से किये जावें तो भी मनुष्य जन्म भर में बहुत धर्म सञ्चित कर सकता है। यह भी ध्यान रहे कि इस भोजनविधि आदि में लिखा कोई विचार अधिक कठिन वा असम्भव सा होने से न सध सके तो भी शेष विधान करना अवश्य अच्छा है ।

रचयिता—

अथ भोजनसूत्रम्

अथातः श्रुतिस्मृतीरनुसृत्य भोजनविधिं व्याख्यास्यामः ॥१॥ आचान्तो धृतोत्तरीयवस्त्रो धृतश्रीखण्डगन्धपुण्ड्रो भोजनशालायामागत्य गोमयेनोपलिप्य शुचौ देशे विहितपीठाधिष्ठितो नित्यम्प्राङ्मुखो न दक्षिणामुखो न प्रत्यङ्मुखो न विदिङ्मुखः ॥२॥ श्रीकामश्चेत्प्रत्यङ्मुखः सत्यकामश्चेदुदङ्मुखो यशस्कामश्चेद्दक्षिणा-मुखो जीवन्मातृकवर्जम् ॥३॥ हस्तपादास्येषु पञ्चार्द्रः ॥४॥ नीवारचूर्णैर्गोमृदा भस्मनोदकेन वा मण्डलं कुर्यात् ॥५॥ चतुष्कोणं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य मण्डलाकारं वैश्यस्याभ्युक्षणं शूद्रस्य ॥६॥ यस्याचक्रायुधोविष्णु-

स्त्रैलोक्यं परिरक्षति । स्वयंमण्डलमस्मैतत्सर्व-
भूतानिरक्षतित्विति ॥७॥ तन्नभूमौनिहितपात्रेऽन्ने
परिविष्टेपितुन्नु स्तोपमित्यन्नथ्ठ स्तुत्वा
मानस्तोके नमोवःकिरिकेभ्यो, नमःशम्भवाये-
त्यभिमन्त्र्य प्रोक्षयेत् ॥८॥ ऋत्यंत्वर्त्तेनपरिषि-
ञ्चामीति प्रातः, ऋतंत्वा सत्येन परिषिञ्चामी-
ति सायम् ॥९॥ तेजोऽसिशुक्रमस्यमृतमसीति
यजुषाऽन्नमभिमृश्याग्निध्यात्वा भूपतये भुवन-
पतये भूतानाम्पतयइति प्रणवादिकैः स्वाहा-
नमोऽन्तैर्मन्त्रैः प्रतिमन्त्रं बलीन् हरेत् ॥१०॥
अन्तश्चरसिभूतेषु गुहायां विश्वतोमुखः ।
त्वंब्रह्मत्वंयज्ञस्त्वं वषट्कारस्त्वमोङ्कारस्त्वं
विष्णोःपरमं पदम् ॥११॥ अमृतोपस्तरणमसि-
स्वाहेति विष्णुमन्त्रमभिध्यायन्नाचम्यान्नममृतं
ध्यायन्मौनोहस्तचापल्यादिरहितो मुखे पञ्च
प्राणाहुतीर्जुहोति ॥ १२ ॥ १ ॥

प्राणाय स्वाहाऽपानायस्वाहा व्यानाय-
स्वाहा समानाय स्वाहोदानाय स्वाहेति क्रमं
याज्ञावल्क्योऽमन्यत ॥१॥ उदानायस्वाहा स-
मानाय स्वाहेति क्रमं शौनकबौधायनौ ॥ २ ॥
याज्ञवल्क्योदितक्रमो वाजसनेयिनाम् ॥ ३ ॥
दन्तैर्नोपस्पृशन् जिह्वया ग्रसेत् ॥४॥ अंगुष्ठप्रदे-
शिनीमध्यमाभिः प्रथमां, अङ्गुष्ठमध्यमाना-
मिकाभिर्द्वितीयाम्, अङ्गुष्ठानामिकाकनिष्ठि
काभिस्तृतीयां, कनिष्ठिकातर्जन्यङ्गुष्ठैश्चतुर्थीं-
सर्वाभिरङ्गुलीभिः साङ्गुष्ठाभिः पञ्चमीम्॥५॥
अङ्गुष्ठानामिकाभ्यांग्राह्याह्येता आहुतयइति
हारीतव्याख्यातारः॥६॥ सर्वाभिरङ्गुलीभिरेता-
इति बौधायनः ॥७॥ मौनं त्वंकृत्वाप्राग्द्रवरूप-
मश्नीयान्मध्ये कठिनमन्ते पुनर्द्रवाशी स्यात्
॥८॥ मधुरं पूर्वं लवणाम्लौ मध्ये कटुतिक्ता दि-

कान् पश्चाद्यथासुखं भुञ्जीत ॥८॥ भुञ्जानो वामहस्तेनान्नं न स्पृशेन्न पादौ न शिरो न वस्ति न पदा भोजनथं स्पृशेत् ॥१०॥ एवं यथारुचि भुक्त्वा भुक्ताच्छेषमन्नमादाय, मद्भुक्तोच्छिष्टशेषं ये भुञ्जते पितरोऽधमाः। तेषामन्नं मया दत्त मक्षय्यमुपतिष्ठतु, इति पितृतीर्थेन दक्षिणतो दत्त्वा-अमृतापिधानमसि स्वाहेति हस्ते गृहीतानामपामर्द्धं पीत्वाऽर्धं भूमौ निक्षिपेत्-रौरवे पूयनिलये पद्मार्बुदनिवासिनाम्। अर्थिनां सर्वभूतानामक्षय्यमुपतिष्ठतु-इति ।११ तस्माद्देशादपसृत्य गण्डूषशलाकादिभिस्तर्जनीवर्जमास्यं शोधयेत् ॥१२॥२॥

न भार्यादर्शनेऽश्नीयान्न भार्यया सह न सन्ध्ययोर्न मध्याह्ने नार्द्धरात्रे नायज्ञोपवीती नार्द्रवासा नैकवासा न शयानो न ताम्रभाजने

न भिन्ने न राजतसौवर्णशङ्खस्फाटिककांस्य-भाजनवर्जे न लौहे न मृण्मये न सन्धिसंस्थि-स्थिते न भुवि न पाणौ न सर्वभोजी स्यात् किञ्चिद्भोज्यं परित्यजेदन्यत्र घृतपायसदधि-सक्तुपललमधुभ्यः ॥१॥ साच्वाचान्तो दक्षिण पदाङ्गुष्ठे पाणिं निःस्रावयेत्-अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठंच समाश्रितः। ईशःसर्वस्यजगतः प्रभुःप्रीणातुविश्वभुक्-इति ॥ २ ॥ मधाम्राः-पीताइति नाभिमालभेत-अमृताद्दत्यतःप्राक् ॥३॥ अगस्त्यंवैनतेयञ्च शनिञ्चवडवानलम्। आहारपरिणामार्थं स्मरेद्भीमंचपञ्चमम्, इत्यु-दरमालभ्य ॥४॥ शर्यातिंचसुकन्यांचच्यवनंशक्र-मश्विनौ। भोजनान्ते स्मरेन्नित्यंतस्यचक्षुर्न हीयते॥ इति स्मृत्वा मुखशुद्धिं कुर्यात् ॥५॥ नमो भगवते वाजसनेयाय याज्ञवल्क्याय नमो भगवते वाजसनेयाय याज्ञवल्क्याय ॥ ६ ॥ ३ ॥

अथ भोजनप्रयोगः ।

भोजनशालासन्निधावुपलिप्ते प्राङ्मुख आसीनो भोजनपात्रस्याधो दक्षिणत उदकेन चतुरस्रं चतुरङ्गुलं मण्डलं यथा चक्रायुध-इति मन्त्रेण कुर्यात् । ओं यथाचक्रायुधोविष्णुस्त्रैलोक्यंपरिरक्षति । एवमण्डलभस्मैतत्सर्वभूतानिरक्षतु॥१॥तदुपरिघृताक्तान्नसहितं भोजनपात्रंस्थापयित्वा स्वभोजनस्थानं रेखया परिच्छेद्य पितुन्नुस्तोषमित्यन्नं स्तुयात्-ओं पितुन्नुस्तोषंमहोधर्माणंतविषीम् । यस्यत्रितोव्योजसावृत्रंविपर्वमर्दयत् ॥२॥ [शु० य० ३४ । ७] ततो मानस्तोकइति मन्त्रत्रयेणान्नाभिमन्त्रणम्-ओं-मानस्तोकेतनयेमानआयुषि मानोगोषुमानेऽअश्वेषुरीरिषः । मानोवीरान्रुद्रभामिनोवधीर्हं-विष्मन्तः सदमित्त्वाहवामहे ॥३॥ [शु० य० १६ । १६] ओं नमो वःकिरिकेभ्यो-

देवानाꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो-
विक्षिणत्केभ्यो नमआनिहतेभ्यः ॥४॥ [शु० य०
१६ । ४६] ओं नमः शम्भवायच मयोभवायच
नमः शिवायच शिवतराय च ॥५॥ [शु० य० १६
४१ ।] ओं सत्यन्त्वर्त्तेन परिषिञ्चामि ॥६॥ इति
मन्त्रेण प्रातरन्नं प्रोक्षयेत् । ओं ऋतंत्वासत्येन
परिषिञ्चामि ॥७॥ इति मन्त्रेण सायंभोजनेऽन्न-
प्रोक्षणम् । ततस्तेजोऽसीति दक्षिणकरेणान्नं
स्पृशेत् । ओं, तेजोऽसिशुक्रमस्यमृतमसि धाम-
नामासि । प्रियंदेवानामनाधृष्टं देवयजनमसि
॥८॥ [शु० य० १ । ३१] ततो अग्निरस्मीत्या-
त्मान्नं वैश्वानराग्निरूपं ध्यायेत् । ओ३म्-अ-
ग्निरस्मि जन्मना जातवेदा घृतंमेचक्षुरमृतंम-
आसन् । अर्कस्त्रिधातूरजसो विमानोऽजस्रो-
घर्मो हविरस्मिनाम ॥९॥ [शु० य० १८ । ६६]
ततोभूपतयइत्यादित्रिभिर्मन्त्रैर्भूमौ बलित्रयं

दद्यात् ओं-भूपतये स्वाहानमः ॥१॥ ओं भुवन-पतये स्वाहानमः ॥११॥ भूतानां पतये स्वाहा नमः ॥१२॥ ततोदक्षिणहस्ते जलमादायान्नं स्तुवन्स्वाहान्तमाचामेत् ओ३म्-अन्नं ब्रह्मरसो-विष्णुर्भोक्तादेवोमहेश्वरः । एवंध्यात्वाद्विजो-भुङ्क्ते सोऽन्नदोषैर्नलिप्यते ॥१३॥ ओमन्तश्च-रसिभूतेषु गुहायां विश्वतोमुखः । त्वंब्रह्मत्वंयज्ञ-स्त्वं वषट्कारस्त्वमोङ्कारस्त्वं विष्णोःपरमं पदम् ॥१४॥ ओ३म् अन्नपतेऽन्नस्यनोदेह्यनमीव-स्यशुष्मिणः । प्रप्रदातारन्तारिष ऊर्जं नोधेहि-द्विपदेचतुष्पदे ॥१५॥ [शु० य० ११ । ८३] ओ३म् अमृतोपस्तरणमसिस्वाहा ॥१६॥ ततः पञ्चप्राणा-हुतीर्निम्नमन्त्रैर्मुखे जुहुयाद्दन्तैरस्पृशन् ग्रसेत् ओं प्राणायस्वाहा ॥१७॥ ओं अपानाय स्वाहा ॥१८॥ ओं-व्यानाय स्वाहा ॥१९॥ ओं समानाय

स्वाहा ॥२०॥ ओंउदानायस्वाहा ॥२१॥ ततोवा-
महस्तलग्नोदकेन नेत्रे स्पृशेत् । पश्चाद्ब्रह्मपा-
शेति मन्त्रेण शिखां मोचयेत् ओं ब्रह्मपाशसह-
स्राणि शिखामुक्तिं करोम्यहम् ॥२२॥ ततोयथे-
च्छंभुक्त्वा भोजनान्ते उच्छिष्टशेषान्नस्य पात्र
वामभागे पितृतीर्थेनभूमौ चित्राहुतिं दद्यात् ।
ओं-मद्भुक्तोच्छिष्टशेषंये भुञ्जतेपितरोऽधमाः ।
तेषामन्न मयादत्त-मक्षय्यमुपतिष्ठतु ॥२३॥ पश्चा
द्दक्षिणकरे जलमादाय ओं अमृतापिधानमसि
स्वाहा ॥२४॥ इतिमन्त्रेणार्द्धं पीत्वा शेषमुच्छि-
ष्टान्नस्य चित्राहुतौ पितृतीर्थेन मन्त्रं पठित्वा
पातयेत् ओं रौरवेपूयनिलयेपद्मार्बुदनिवासिनाम्
अर्थिनांसर्वभूतानामक्षय्यमुपतिष्ठतु ॥२५॥ ततो
वामहस्तेन तूष्णीं शिखां बद्ध्वा भोजनपात्रा-
द्बलीन् चित्राहुतिं चादायोत्थाय तदन्नं का-
कादिभ्यः क्षिपेत् । पश्चाद्धस्तौ मुखं च सम्य-

क्मप्रक्षाल्य दक्षिणहस्तगृहीतमुदकमङ्गुष्ठमात्र-
इतिमन्त्रेण दक्षिणपादांगुष्ठे पातयेत् । ओं अ-
ङ्गुष्ठमात्रः पुरुषो अङ्गुष्ठञ्चसमाश्रितः । ईशः
सर्वस्यजगतः प्रभुः प्रीणातुविश्वभुक् ॥२६॥ ततः
श्वात्राः पीताइति नाभिमालभेत । ओं श्वात्राः
पीताभवतयूयमापो अस्माकमन्तरुदरेसुशेवाः ।
ताऽअस्मभ्यमयक्ष्माअनमीवा अनागसः स्वदन्तु-
देवीः ॥२७॥ [शु० य० ४ । १२] ततोऽगस्त्य-
मित्युदरमालभेत ओम् अगस्त्यंवैनतेयंच शनिं-
च वडवानलम् । अन्नस्यपरिणामार्थं स्मरेद्भीमंच
पञ्चमम् ॥२८॥ ततो जलेन नेत्रयोरुपस्पर्शनम्-
ओं शर्यातिंचसुकन्यांच च्यवनंशक्रमश्विनौ ।
भोजनान्तेस्मरेन्नित्यं तस्यचक्षुर्नहीयते ॥२९॥
इति स्मृत्वा लवङ्गताम्बूलादि भक्षयेत् ॥

॥ इति भोजनविधिः ॥

भावार्थ—रसोई खाने के समीप गोबरादि से लीपे वा पोते चौका में पूर्व को मुख कर बैठा मनुष्य भोजन पात्र के नीचे जल से वा भस्म से चार अङ्गुल का चौकोन मण्डल (ययाचक्रा०) मन्त्र पढ़के करे। उनके ऊपर घी से चुपड़े अन्न सहित भोजन पात्र को रख के जलादि की रेखा द्वारा अपने चौका को छेक कर (पितुन्नु०) मन्त्र से अन्न की स्तुति करे। तत्पश्चात् (मानस्तोके०) इत्यादि तीन मन्त्रोंको पढ़ता हुआ रुद्ररूप से अन्न को देखे। फिर (सत्य०) मन्त्र से प्रातःकाल और (ऋतं०) मन्त्र से सायंकाल किञ्चित् जल से भोजनान्न का सेचन करे। पश्चात् (तेजोऽसि०) इत्यादि मन्त्र पढ़ता हुआ भोजनान्न का स्पर्श करले (अग्नि-रस्मि०) मन्त्र से अपने को अग्निरूप ध्यान करे। तिस पीछे (भूपतये०) इत्यादि तीन मन्त्रोंसे तीन बलि पूर्व २ को भूमि पर धरे। फिर दहिने हाथ में जल लेकर अन्न जल की स्तुति करता हुआ (अन्नं ब्रह्म०) इत्यादि चार मन्त्रों के अन्त में आचमन करे। तत्पश्चात् (प्राणा०) इत्यादि पांच मन्त्रों से पांच प्राणाहुति मुख में करे। और उन का दांतोंसे स्पर्श न करता हुआ निगल जावे। फिर वाम हाथमें लगाये जलसे

दोनों आंखों का स्पर्श करके (ब्रह्मशाप०) मन्त्र से शिखा को खोल देवे। तत्पश्चात् यथेष्ट भोजन करके भोजनान्त में उच्छिष्ट शेष अन्न की चित्राहुति भूमि पर पात्र से वाम भाग मे पितृतीर्थ से (मद्भुक्तो०) मन्त्र पढ़के देवे। तिस के बाद दाहिने हाथ में जल लेके (अमृतापि०) मन्त्र से आधा जल पीकर शेष जल को (रौरवे०) मन्त्र से चित्राहुति पर पितृ- तीर्थ से छोड़ देवे। फिर वाम हाथ से विना मन्त्र शिखाको बांधकर भोजनपात्र से वलियों तथा चित्राहुति को लेकर उ- ठके उस अन्न को कौवे आदि को फेंक देवें। फिर हाथ मुख सम्यक् धोके दहिने हाथ में लिये जल को (अंगुष्ठमात्र०) मन्त्र पढ़के दहिने पगके अंगूठे पर छोड़ देवे। फिर (श्वात्रा) मन्त्र से अपनी नाभि का स्पर्श करे। (अगस्त्यं०) मन्त्रसे उदर स्पर्श करके (शर्यातिं०) मन्त्र से जलपूर्वक दोनों आंखों का स्पर्श करे। फिर लौंग ताम्बूलादि खावे।

॥ इति भोजनविधिः समाप्तः ॥

षोड्शसंस्कार विधिः ।

हिन्दी भाषा में अब तक संस्कारों के विषय में सांगोपाँग पुस्तक कोई नहीं छपी, द्विजातियों के लिये संस्कार बड़ी प्यारी वस्तु है और वर्त्तमान में संस्कारों की दशा प्रत्येक हिन्दू गृहस्थ के यहां बड़ी शोचनीय हो रही है। शायद ही किसी भाग्यवान्के यहां पूरे २ सोलह संस्कार होते हों नहीं तो ४-६ संस्कारों का कर लेना ही आजकल मुख्य कर्त्तव्य समझा जाता है, इस में एक कारण यह भी है कि संस्कारों की अब तक पूर्ण पुस्तक कोई नहीं छपीं, संस्कार भास्कर आदि जो पुस्तकें बम्बई आदि में छपी हैं वे संस्कृत में होनेसे सर्वसाधारणके उपयोगी नहीं। ऐसी कठिनताओं को देखकर पं० भीमसेन जी शर्मा ने इस पुस्तक की रचना की है इसमें गर्भाधान, पुंसवन, सीमन्त, जातिकर्म, नामकरण, निष्क्रमण अन्नप्राशन, चूड़ाकर्म, कर्णवेध, उपनयन; वेदारम्भ, केशान्त, समावर्त्तन, विवाह, आवसथ्याधान, श्रौताधान १६ संस्कार पूरे२ विस्तार पूर्वक दिये हैं इसके सिवाय षष्ठीपूजन बालरक्षा, आन्दोलशयन भूम्युवेशन, जन्मदिनपूजा, अक्षरारम्भ आदिअन्य गौण संस्कार भी पूरे२ दिये गये हैं। ऊपर मूल संस्कृत और नीचे भाषा में उनके करने की पूर्ण विधि लिखी गई है जिसके सहारे थोड़े पढ़े लिखे भी संस्कार करा सकते हैं बड़ी उपयोगी पुस्तक है मू० २।) है

पुस्तक मिलने का पता—

मैनेजर ब्रह्मप्रेस

इटावा ।